वैयाकरणसिद्धान्तकौमुदी

अजन्तस्त्रीलिङ्गप्रकरणम् (१०)

१४.०६.२०११

- ईकारान्तः स्त्रीलिङ्गः श्री-शब्दः
- श्रयन्ति एताम् इति श्रीः – 'श्रि' धातोः क्विबन्तरूपम् । धातोः ईकारः ।
- श्रीः
- अङ्यन्तत्वान्न सुलोपः ।
- श्रियौ
  - अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (६.१.७७) इति अजादौ प्रत्यये परे इयङ्
- श्रियः

३०३. नेयङुवङ्स्थानावस्त्री (१.४.४)

- पदत्रयम् । न, इयङ्-उवङ्स्थानौ, अस्त्री ।
- 'यू स्त्र्याख्यौ नदी' (१.४.३) इति अनुवर्तते ।
- इयङ्-उवङोः स्थितिः ययोः तौ ईदूतौ नदीसंज्ञौ न स्तः, न तु स्त्री ।
- हे श्रीः

- श्रियम्, श्रियौ, श्रियः
- अमि पूर्वरूपम्, शसि पूर्वसवर्णदीर्घं च बाधित्वा परत्वाद् इयङ्

- श्री (ङे) ए
- श्री ए (‘ङिति ह्रस्वश्च’ – १.४.६ – इति वैकल्पिकी नदीसंज्ञा)
- श्री आ ए (‘आण् नद्याः’ – ७.३.११२ – इति आडागमः)
- श्री ऐ (‘आटश्च’ – ६.१.९० - इति वृद्धिः)
- श्रियै (‘अचि श्नुधातुभ्रुवां य्वोरियङुवङौ’ – ६.१.७७)
- नदीसंज्ञायाः अभावे घिसंज्ञा तु न, ह्रस्वान्तत्वाभावात् ।
- श्रिये (‘अचि श्नुधातुभ्रुवां य्वोरियङुवङौ’ – ६.१.७७)

- श्रियाः/ श्रियः
- श्रियोः

३०४. वाऽमि (१.४.५)

- पदद्वयम् । वा, आमि ।
- 'यू स्त्र्याख्यौ नदी' (१.४.३) इति, 'नेयङुवङ्स्थानावस्त्री' (१.४.४) इत्यतः 'इयङुवङ्स्थानावस्त्री' इति च अनुवर्तते ।
- इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तः, न तु स्त्री ।
- श्रीणाम्, श्रियाम् ।

- श्रियाम्, श्रियि ।

ईकारान्तः स्त्रीलिङ्गः श्रीशब्दः

अजादिषु प्रत्ययेषु 'अचि श्नु..' इति इयङ्

अङ्यन्तत्वात् न सुलोपः

नदीत्वाभावात् न ह्रस्वः

		द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	श्रीः	श्रियौ	श्रियः
सम्बोधनविभक्तिः	हे श्रीः	हे श्रियौ	हे श्रियः
द्वितीयाविभक्तिः	श्रियम्	श्रियौ	श्रियः
तृतीयाविभक्तिः	श्रिया	श्रीभ्याम्	श्रीभिः
चतुर्थीविभक्तिः	श्रियै/श्रिये	श्रीभ्याम्	श्रीभ्यः
पञ्चमीविभक्तिः	श्रियाः/श्रियः	श्रीभ्याम्	श्रीभ्यः
षष्ठीविभक्तिः	श्रियाः/श्रियः	श्रियोः	श्रीणाम्/श्रियाम्
सप्तमीविभक्तिः	श्रियाम्/श्रियि	श्रियोः	

ङित्सु प्रत्ययेषु 'ङिति ह्रस्वश्च' इति विकल्पेन नदीसंज्ञा, तत्प्रयुक्तः आट्

आमि 'वाऽमि' इति विकल्पेन नदीसंज्ञा, तत्प्रयुक्तः नट

- प्रध्यायतीति प्रधीः ।
- नदीसंज्ञा अस्य शब्दस्य भवति, उत न? इति प्रश्नः ।
- 'यू स्त्र्याख्यौ नदी' इत्यनेन नित्य-स्त्रीलिङ्गशब्दानां नदीसंज्ञा इत्युच्यते । नित्यस्त्रीलिङ्गत्वं नाम किम् इत्यत्र सन्ति मतभेदाः ।
- प्रधीशब्दस्य तु वृत्तिकारादीनां मते लक्ष्मीवद्रूपम्, 'पदान्तरं विनापि स्त्रियां वर्तमानत्वं नित्यस्त्रीत्वम्' इति स्वीकारात् ।
- 'लिङ्गान्तर-अनभिधायकत्वं तत्' इति कैयटमते तु पुंवद्रूपम् ।

- ‘प्रकृष्टा धीः’ इति विग्रहे तु लक्ष्मीवत् ।
- अङ्यन्तत्वान्न सुलोपः । मतद्वयेऽपि नित्यस्त्रीलिङ्गत्वात् नदीसंज्ञा अस्ति ।
- अमि शसि च प्रध्यम्, प्रध्यः – इति विशेषः ।
- पूर्वरूपं पूर्वसवर्णदीर्घं च बाधित्वा इयङि प्राप्ते, तदपि बाधित्वा ‘एरनेकाचोऽसंयोगपूर्वस्य’ इति यण् ।

- सुष्ठु धीः यस्याः, सुष्ठु ध्यायति वा इति विग्रहे वृत्तिकारमते सुधीः श्रीवत् ।
- 'न भूसुधियोः' इति निषेधात् यण् न । 'अचि श्नु..' इत्यादिना इयङ् । नदीत्वम् अस्ति ।
- मतान्तरे तु पुंवत् ।
- नदीत्वाभावात् तत्प्रयुक्तानि कार्याणि न ।
- सुष्ठु धीः इति विग्रहे तु श्रीवदेव ।
- उभयमते नदीत्वं भवति ।

- ग्रामणीः पुंवत् ।
- ग्रामनयनस्य उत्सर्गतया पुंधर्मतया पदान्तरं विनापि स्त्रियाम् अप्रवृत्तेः ।
- मतद्वयेऽपि नित्यस्त्रीलिङ्गत्वं नास्ति ।
- एवं खलपवनादेरपि पुंधर्मम् औत्सर्गिकं बोध्यम् ।

उकारान्ताः स्त्रीलिङ्गाः

- धेनुर्मतिवत् ।
- उकारान्तः स्त्रीलिङ्गः ‘क्रोष्टु’ शब्दः ।

३०५. स्त्रियां च (७.१.९६)

- पदद्वयम् ।
- ‘तृज्वत्क्रोष्टुः’ (७.१.९५) इति अनुवर्तते ।
- स्त्रीवाची क्रोष्टुशब्दः तृजन्तवद्रूपं लभते ।

- क्रोष्टु
- क्रोष्टृ (‘स्त्रियां च’ इति तृज्वद्भावः)

३०६. ऋन्नेभ्यो ङीप् (४.१.५)

- पदद्वयम् । ऋत्-नेभ्यः, ङीप् ।
- ‘ङ्याप्प्रातिपदिकात्’ (४.१.१) इति, ‘स्त्रियाम्’ (४.१.३) इति च अधिक्रियते।
- ऋदन्तेभ्यः नान्तेभ्यश्च स्त्रियां ङीप् स्यात् ।

- क्रोष्टृ (ङीप्) ई
- क्रोष्ट्री (‘इको यणचि’ – ६.१.७७)
- क्रोष्ट्री क्रोष्ट्र्यौ क्रोष्ट्र्यः
- गौरीवद्रूपाणि ।